अङ्क-२८
जुलाई-दिसम्बर २०१६

**वेदविद्या**
ISSN-2230-8962

# अथर्ववेदवैशिष्ट्यम्

**जयन्तपति त्रिपाठी**

वेदोऽयमनेकधादृष्ट्या महत्त्वपूर्णोऽस्ति। गोपथब्राह्मणे सर्वश्रेष्ठोऽयं वेद इत्युक्तः। अयं ब्राह्मणादीनां नाशकतत्त्वविनाशार्थं प्रकटितः।[१] अथर्वपरिशिष्टस्य कथनमस्ति यदमत्यमन्मेषु शक्तिः सन्निहिताः एभिः सर्वा शक्तय सिद्धयश्च लब्धुं शक्यन्ते।[२] स्कन्दपुराणीयकमलालयखण्डेऽथर्ववेदस्य महत्त्वमभिहितं यत् एतदीयमन्त्रजपादभीष्टसिद्धिर्जायते।[३] विष्णुपुराणेऽभिहितं यदथर्ववेदविदेव ब्रह्मा भवति तेनैव राज्ञां शान्तिकर्म पौष्टिकञ्च कर्म करणीयमिति[४] अथर्वपरिशिष्टे समुपवर्णितमस्ति। यद् यस्य राज्ञः राष्ट्रे अथर्वविद् वसति तद्राष्टं निरुपद्रवं भूत्वा समृद्धं जायते।[५]

मत्स्यपुराणेऽभिहितं यद् राजा अथर्वज्ञं पुरोहितं वृणुयादिति।[६] प्रस्थाने भेदेऽभिहितं यदयं वेदोऽति विलक्षणः यद्यप्ययं यज्ञानर्हस्तथापि शान्तिकपौष्टिक-अभिचारकर्मणां निरूपणादयमद्भुतः।[७] अनेन ज्ञायते यदयं वैदिकसाहित्ये सर्वश्रेष्ठ उच्चस्थानीयोऽस्तीति।

### अथर्ववेदस्य विविधनामानि

अथर्वन्शब्दस्य व्याख्या निर्वचनञ्च निरुक्ते समुपलभ्यते। निरुक्तानुसारं थर्व धातुः गत्यर्थकः। थर्वत् इत्यस्य अर्थोऽस्ति गतिशीलः तथा अथर्वन् इत्यस्यार्थोऽस्ति गतिहीनः निश्चलः स्थिरश्च।[८] गोपथब्राह्मणानुसारं ''अथार्वाक्'' अर्थ-अर्वाक् शब्दाभ्यां अथर्वा निर्मितः। अथर्वा प्रजापतिर्नामास्ति[९] पूर्वोक्तव्युत्पत्त्यनुसारं यो गतिहीनो निश्चलश्च स अथर्वेत्युच्यते।

---

[१] श्रेष्ठो हि वेदस्तपसोऽधिजातो ब्रह्मज्यानां क्षितेय संबभूव। गो०ब्रा० १.१.९

[२] न तिथिर्न च नक्षत्रं न ग्रहो न च चन्द्रमाः। अथर्वमन्त्रसम्प्राप्या सर्वसिद्धिर्भविष्यति॥ अथर्वपरिशिष्टम् २.५.५

[३] यस्तथाथर्वणान् मन्त्रान् जपेत् श्रद्धासमन्वितः।
तेष्वर्थोद्भवं कृत्स्नं फलं प्राप्नोति स ध्रुवम्॥ स्कन्दपुराणम्

[४] पौरोहित्यं शान्तिकपौष्टिकानि राज्ञाम् अथर्ववेदेन कारयेद् ब्रह्मत्वं च। विष्णुपुराणम्

[५] यस्य राज्ञो जनपदे, अथर्वा शान्तिपारगः।
निवसत्यपि तद् राष्ट्रं, वर्तते निरुपद्रवम्॥ अथर्वपरिशिष्टम् ४.६.१

[६] पुरोहितं तथाथर्वमन्त्रब्राह्मणपारगम्॥ मत्स्यपुराणम्

[७] अथर्ववेदस्तु यज्ञानुपयुक्तः शान्तिपौष्टिकामि चारादिकर्मप्रतिपादकत्वेन। अत्यन्तविलक्षण एव। प्रस्थानभेदः

[८] अथर्वाणोथनवन्तः। थर्वतिश्चरतिकर्मा। तत्प्रतिषेधः। निरुक्तम् ११.१८

[९] अथार्वाग् एनम् एवास्वेवाप्सु अन्विच्छेति तदथर्वाऽभवत्। तद् अथर्वणोऽथर्वत्वम्। अथर्वा वै प्रजापतिः।
गो०ब्रा०१.१.४

इत्थमथर्वेत्यस्यार्थो योगी भजति। अथर्ववेदे अथर्वन्नित्यस्य सम्बन्धो योगयोगीभ्यां कृतोऽस्ति। स मस्तिष्कं हृदयञ्च समन्वेति[१०] सीव्यति।

अवेस्ताभाषाया "अभवत्" "शब्दः" अथर्वन्निति य प्रतिनिधिरस्ति। अयम् ऋत्विगथवा अग्निपूजकोऽस्ति। इत्थं अथवन् अथर्वन्निति शब्दद्वयं पुरोहितेनाथवा ऋत्विजा सम्बद्धमस्ति। पाश्चात्यविदुषां मतानुसारं शुभकर्मप्रतिपादकमन्त्राणां कृते "अथर्वन्" शब्दोऽस्ति, अभिचारादिसम्बन्धमन्त्राणां कृते अङ्गिरसशब्दो वर्तते।[११]

विभिन्नग्रन्थेषु अथर्ववेदस्य नवधानामान्युपलभ्यन्ते। तेषां सङ्क्षिप्तविवरणं निम्नाङ्कितमस्ति—

१. **अथर्ववेदः** - अथर्वन्ऋषिनाम्नाऽस्य वेदस्याथर्ववेदोऽभवत्। अथर्ववेदे १६१२ मन्त्राणां द्रष्टाऽथर्वनृषिरस्ति। गोपथब्राह्मणस्य कथनमस्ति अधिकांशमन्त्राणां द्रष्टाऽथर्वनृषिस्तथा तद्वंशजोऽस्तीत्यतोऽस्य वेदस्य नाम अथर्ववेदोऽभवत्।[१२]

२. **आङ्गिरसवेदः** - गोपथब्राह्मणस्य कथनमस्ति यदङ्गिरस ऋषिस्तद्वंशजाश्चैव मन्त्राणां द्रष्टार अत एवास्य वेदस्य नाम आङ्गिरसवेदो जातम्।[१३] गोपथब्राह्मणस्येदमपि कथनमस्तीति यदङ्गिरसवंशजा विंशति ऋषय आसन्, ते दशधासूक्तानां द्रष्टार आसन्। दशधासूक्तानां सन्ति- १, २, ३, ४, ५, ६, ७, १२, १६, १८ मन्त्रवन्ति सूक्तानि। एतत्सूक्तद्रष्टाराङ्गिरस तद्वंशजाः सन्ति।[१४]

३. **अथर्वाङ्गिरसवेदः** - वेदस्यास्य प्राचीनं नामाथर्वाङ्गिरसो विद्यते अथर्वन् ऋषिभ्यां दृष्टमन्त्राणां सङ्ग्रहादि नाम जातम्। अर्थवेदे यस्य नामोपलभ्यते।[१५] गोपथब्राह्मणेऽपीदं नामोपलभ्यते।[१६] ब्ल्यूमफील्ड विन्टरनित्साभ्यामस्य नाम्नो व्याख्या ईदृशी कृता तयोः कथनमस्ति यदवेस्ताभाषाया अथवन् शब्दोऽथर्वन् इत्यस्य प्रतिनिधिरस्ति। यस्यार्थोऽस्ति पुरोहिताऽयमग्निपूजक आसीत्। अथर्ववेदोऽसि यज्ञाग्निपूजयोर्विश्वसिति। अथवन् पौरोहित्येन यातु (जादू) कार्यमपि करोतिस्म। अङ्गिरसोऽपि प्रागैतिहासिककालिकः पुरोहितोऽस्ति। द्वावपि याज्ञिककर्मणा साकं यातु "जादू" विद्यापारङ्गतौ आस्ताम्। अथर्वाङ्गिरसोर्भेदोऽयमस्ति यत् अथर्वन्मन्त्रेषु सुखशान्तिप्रदाशुभदा यातु

---

[१०] मूर्धानमस्य संसीव्याथर्वा हृदयं च यत्। अथर्व० १०.२.२६

[११] विन्टरनित्सः, हिस्ट्री आफ इण्डियन् लिटरेचर, पृ० ११९-१२०

[१२] तान् अथर्वणऋषीन् आथर्वणौश्च आर्षेयान् अभ्यश्राम्यत.......तेभ्यः श्रान्तेभ्यः........ यान् मन्त्रान् अपश्यत् स आथर्वणोवदोऽभवत्। गोपथब्रा० १.१.५

[१३] तान् अङ्गिरस ऋषी .......अभ्यश्राम्यत् .......तेभ्य श्रान्तेभ्य: यान् मन्त्रान् अपश्यत् स आङ्गिरसोवेदोऽभवत्। गोपथब्रा० १.१.८

[१४] तस्मात् सन्तप्तान् विंशिनअङ्गिरस ऋषीन् निरमिमत.........दशतमान् आङ्गिरसान् आर्षेयान् निरमितत। षोडशिनोऽष्टादशिनो द्वादशिनः एकर्चान् तृचान् - गोपथ ब्रा० १.१.८

[१५] अथर्वाङ्गिरसो मुखम् - अथर्व० १०७.२०

[१६] अथर्वाङ्गिरोविदं ब्राह्मणम् - गोपथ ब्रा० १.३.१

जादूविद्या वर्तते, एषु रोगनिवारका मन्त्राः सन्ति। आङ्गिरसमन्त्रेषु कृत्याप्रयोगपरा अभिचारका शत्रुविनाशकाश्च सन्ति मन्त्राः।[१७]

**४. ब्रह्मवेदः** - अथर्ववेदस्य प्राचीनं नाम ब्रह्मवेदोऽप्यस्ति। अस्मिन्नेव वेदेऽस्य ब्रह्मवेद इति नाम दत्तमस्ति।[१८] गोपथब्राह्मणेऽप्ययं ब्रह्मवेदत्वेनाभिहितः।[१९] अथर्ववेदे ब्रह्मदृष्टमन्त्रा ८६३ सन्ति। ब्रह्मवेदकथनस्यायभिप्रायोऽयमस्ति यदत्र सविस्तरं ब्रह्मवर्णनमस्ति। परब्रह्मणः प्राप्तिः कथं भवतीति विषयस्य विस्तारपूर्वकं वर्णनमस्ति।

**५. भृग्वङ्गिरोवेदः** - गोपथब्राह्मणेऽस्य नाम भृग्वङ्गिरोवद् इत्यभिहितम्।[२०] भृग्वङ्गिरा ४५५ मन्त्राणां द्रष्टा वर्तते। भृग्वङ्गिरोवेद कथनस्याभिप्रायोऽयमस्तीति भृग्वङ्गिरसवंशीया ऋषयोऽस्य वेदस्य मुख्यद्रष्टारः सन्ति। पुराणेषु भृग्वङ्गिरवंशीयर्षिणां नामानि सन्ति, तेष्वनेके अर्थवेदमन्त्रद्रष्टारः सन्ति। भृगुवंशीयेषु भृगु-दध्यङ्-शौनकादयः सन्त्याथर्वणाः। भृगुशुक्रगृत्समदादयोऽनेकसूक्तानां द्रष्टारः सन्ति। शुक्रदृष्टमन्त्राः सन्ति ९३, भृग्वङ्गिरसदृष्टमन्त्राः ५४३ सन्ति। वायु-ब्रह्माण्ड-मत्स्यपुराणेषु एषां वर्णनं प्राप्यते।[२१] ब्रह्माण्डपुराणे भृगुवंशीया १९ ऋषयो मन्त्रकृतः कथिताः।[२२] एषां सविस्तरं वर्णनं महाभारतीयादिपर्वणि लभ्यते।[२३] अङ्गिरसवंशीया ३३ ऋषयाः पुराणेषूपवर्णिताः सन्ति, अत्र ३२ ऋषीणां नामान्युपलभ्यन्ते यथा- १. अग्निस् २. भितः ३. भरद्वाजः, ४. वाष्कलिः, ऋतवाक् ५. गर्गः, ६. शिनिः, ७. सङ्कृतिः, ८. गुरुवीतः, ९. मान्धाता, १०. अम्बरीषः, ११. युवनाश्वः, १२. पुरूकुत्सः, १३. त्रसद्दस्युः, १४. सदस्युगान्, १५. आहार्यः, १६. अजमीढः, १७. ऋषभः, १८. कापिः, १९. त्रसद्दस्युः, २०. विरूपः, २१. कण्वः, २२. मुद्गलः, २३. उतथ्यः, २४ शरद्वान्, २५. वाजश्रवस्, २६. अवास्म, २७. सुवित्तिः, २८. वामदेवः, २९. असितः, ३०. बृहदुक्थः, ३१. दीर्घतमस्, ३२. कक्षीवाम।[२४] एषु कतिपयर्षीणां नामानि अथर्ववेदे लभ्यन्ते।[२५]

**६. छन्दोवेदः** - वेदस्यास्य प्राचीनं नाम छन्दोवेदोऽप्यस्ति। अथर्ववेदेऽस्य नाम छन्दस् इति प्रदत्तम्।[२६]

---

[१७] विण्टरनित्सः, हिस्ट्री आफ इण्डियन लिटरेचर, पृ० ११९, १२०

[१८] तमृचश्च सामानि च यजूंषि च ब्रह्म चानुव्चलन्। अथर्व० १५.६.८

[१९] ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद इति। गोपथब्रा० १.२.१६

[२०] ब्रह्मा भृग्वङ्गिरोवित्। गोपथब्रा० १.३.१।

[२१] वायुपुराणम् ५१.५६, ब्रह्माण्डपुराणम् २.३२.६२, मत्स्यपुराणम् १४५-१५८

[२२] एते मन्त्रकृत: कृत्स्नशस्तान् निवोधत।
भृगु: काव्य: प्रचेताश्च दधीचो हयप्नवानपि॥
एकोनविंशतिहर्यते भृगवो ब्रह्मवादिन:॥ ब्रह्माण्डपुराणम् २.३२. १०४-१०६

[२३] महाभारतम् आदिपर्व ६०.४०. इतोऽग्रे।

[२४] भगवद्दत्त-वैदिकवाङ्मय का इतिहास भाग १, पृ० २४१-२४३।

[२५] अथर्ववेदः, १८.३.१५-१६।

[२६] छन्दांसि। अथर्व० ११.७.२४। छन्दो ह० अथर्व० १९.६.१३।

७. **महीवेदः** - वेदस्यास्याथर्ववेदे महीवेदोऽपिनाम लभ्यते यतो ह्यत्र महती ब्रह्मविद्याया वर्णनमस्ति।[२७]

८. **क्षत्रवेदः** - शतपथब्राह्मणेऽथर्ववेदोऽयं क्षत्रवेदत्वेनाभिहितः।[२८] क्षत्रवेद-कथनीयायमभि-प्रायोऽस्ति यदत्र क्षात्रधर्म- राष्ट्ररक्षा-राज्यसम्बद्धन-युद्धादीनाञ्च वर्णनमस्ति।

९. **भैषज्यवेदः** - अथर्ववेदेऽयं भैषज्यवेदोप्यभिहितः।[२९] भैषज्यवेद उत भिषग्वेद कथनस्याभिप्रायोऽस्ति यदत्र विविधचिकित्सानामौषधीनाञ्च वर्णनमस्ति।

**अथर्ववेदशाखाः** - पतञ्जलिना महाभाष्येऽथर्ववेदस्य नवधा शाखा अभिहिताः।[३०] प्रपञ्चहृदय-चरणव्यूह-सायणीयाथर्ववेदभाष्यभूमिकासु नवधाशाखानामुल्लेखोऽस्ति। सङ्ख्यासु अभेदेसत्यपि नामसु बहुभेदो विद्यते।

अथर्ववेदभाष्यभूमिकायामस्य नव शाखानामानि। यथा- (१) पैप्पलादः (२) तौदः (३) मौदः (४) शौनकीय: (५) जाजल: (६) जलदः (७) ब्रह्मवद् (८) देवदर्श: (९) चारणवैद्यम्।[३१] इमान्येव नामानि समीचीनानि प्रतीयन्ते। अथर्वणपरिशिष्टचरणव्यूहेऽपीमान्येव शाखानामानि प्रदत्तानि किन्तु तौदस्थाने स्तौद पावो विद्यते।[३२]

अहिर्बुध्न्यसंहिताया १२ एवम् २० अध्याये लिखितमस्ति यदथर्ववेदस्य सन्ति पञ्चशाखा:। एतच्छाखापरम्परायाः वर्णनमन्यत्र नोपलभ्यते।[३३]

१. **शौनकसंहिता** - अथर्ववेदीयनवशाखासु साम्प्रतं शाखाद्वयमुपलभ्यते- शौनकसंहिता, पैप्पलादसंहिता च। अनयोर्द्वयोः शौनकशाखा पूर्णोपलभ्यते तथाऽस्या एवाधिका प्रसिद्धिर्वर्तते। २. पैप्पलादसंहिताया अपि सम्प्रति उपलब्धिरस्ति। काश्मीरी शारदालिप्यां निबद्धा। तत्रत्यराज्ञो रणवीरसिंहस्य कृपयेयं संहिता १८७५ ईसवीये वर्षे प्रो० रूडल्फरोठेनोपलब्धा। १८९५ ईसवीयवर्षं यावदियं संहिता तत्पार्श्वे सुरक्षिता आसीत्। तन्निधनानन्तर ह्यूविंगल यूनिवर्सिटी पुस्तकालये गता। अमेरिकास्थ टीमोरनगरे १९०१ वर्षे अस्या: प्रतिलिपि: प्रकाशिता। काश्मीराद्बहिर्नयनात्पूर्वम् अस्या देवनागरीलिप्यां प्रतिद्वयं कृतमासीत्। एका प्रति पूनास्थभण्डारकरसंस्थायां सुरक्षिता, द्वितीया च

---

[२७] ऋचा साम यजुर्मही। अथर्व० १०.७.१४

[२८] उक्थं.......यजु.........साम.......क्षत्र.......वेद। शतपथब्रा० १४.८.१४. २-४

[२९] ऋचः सामानि भेषजा। यजूंषि होत्रा ब्रूमः। अथर्व० ११.६.१४

[३०] नवधाथर्वणो वेदः। महाभाष्यम् आह्निकम् १

[३१] अथर्ववेदस्य नवभेदा भवन्ति तद्यथा- पैप्पलादाः, तौदाः, मौदाः, शौनकीयाः, जाजला, जलदा, ब्रह्मवदा, देवदर्शा, चारणवैद्याश्चेति। अथर्वभाष्यभूमिका, पृ० २३

[३२] तत्र ब्रह्मवेदस्य नवभेदा भवन्ति। तद्यथा- पैप्पलादाः, स्तौदाः, मौदाः शौनकीयाः, जाजला, जलदा, ब्रह्मवदा, देवदर्शा, चारणवैद्याश्चेति। अथर्वणपरिशिष्टश्चात्र।

[३३] साम्नां शाखाः सहस्रं स्युः, पञ्चशाखा ह्यथर्वणाम्। अहि०सं० १२.९, अथर्वाङ्गिरसो नाम पञ्च शाखा महामुने। अहि० सं० २०.२

मुम्बईस्थरायल एशियाटिक सोसाइटी शाखा-पुस्तकालये विद्यमानाऽस्ति।[३४] पतञ्जलिना महाभाष्येऽथर्ववेदीय "शन्नो देवीरभिष्टये" प्रथममन्त्रः समुद्धृतः। गोपथब्राह्मणस्यादिपदमेवमस्ति।[३५] गुणविष्णुना मन्त्रोऽयं पैप्पलादशाखीय इत्यभिहितः।[३६] अनेन ज्ञायते यत् पतञ्जलिसमये अस्या शाखायाः प्रचुरः प्रचार आसीदिति। पैप्पलादानां संहिताब्राह्मणोऽयं ग्रन्थद्वयमासीत्। पञ्चदृष्ट्ये लिखितमस्ति यत् पैप्पलादसंहिताया काण्डविंशतिकं तद्ब्राह्मणे अध्यायाष्टकमस्ति।

**३. पैप्पलादः** - अयमतविश्रवो अध्यात्मवेत्ता आसीत्। अनेके ऋषय स्वकीयाध्यात्मिक शङ्काशमनार्थमस्य समीपमागच्छन्तिस्म। सुकेशा भारद्वाजादयः षण्मुनयोऽस्य पार्श्वे आध्यात्मिकशङ्कासमाधानार्थमाययुः। अनेन यदुत्तरितं तत् प्रश्नोपनिषद् नाम्ना प्राप्यते।

**४. मौदाः** - महाभाष्ये शाङ्करभाष्ये च मौदस्योल्लेखोऽस्ति।[३७] अथर्वपरिशिष्टे मौदजलदशाखीय-पुरोहित-स्थापनेन राष्ट्रनाशस्य शङ्कोद्भाविता।[३८] अनेन ज्ञायते यदस्या शाखायाः प्रचारो न्यूनत्वं गत इति।

**५. चारणवैद्यः** - अस्य विषये कौशिकसूत्रव्याख्यायाऽथर्ववेदपरिशिष्टेन च ज्ञातो भवति यदियमपि आसीच्छाखेति।[३९] वायुब्रह्माण्डपुराणाभ्यां ज्ञायते यदेतच्छाखासंहिताया ६०२६ मन्त्रा आसन्निति[४०] परन्तु सम्प्रति संहितेयमलभ्या।

**पुराणेषु शाखाविचारः** - भागवत-वायु-विष्णु-ब्रह्माण्डपुराणेषु अथर्ववेदीयशाखोपरि विचारोऽस्ति।[४१] विष्णुपुराणानुसारं सुमन्तुना कबन्धशिष्यमध्यापितवान्। भागवतेऽभिचारकर्म-प्रचारकत्वात्सुमन्तुरयं दारुणमुनिरिति कथ्यते। कबन्धेन देवदर्श पथ्यनामकं शिष्यद्वयमथर्ववेदमध्यापितम्। देवदर्श शिष्यचतुष्टयमासीत् मोद-ब्रह्मबल-पिप्पलाद-शौनकायन्युत शौष्कायनिश्च। पथ्यस्य शिष्यत्रयमासीत् जाजलि-कुमुदादि-शौनकश्च। शौनकेन बभ्रुसैन्धवायन शिष्यद्वयमथर्ववेदमध्यापितम्।[४२]

---

[३४] वैदिकवाङ्मय का इतिहास, पृ० २२३।
[३५] शंनो देवीरभिष्टये, इत्येवमादिकृत्वा अथर्ववेदमधीयते। गोप० १.१.२९।
[३६] शंनो देवीरभिष्टये। अथर्ववेदादि मन्त्रोऽयं पिप्पलाद्दृष्टः (छान्दोग्यमन्त्रभाष्यम्)
[३७] मौदकम्। पैप्पलादकम्। महाभाष्यम् ४.१.८६.४.२.१०४ मौदाः, पैप्पलादाः महाभा० ४.२.६६।
[३८] पुरोधा जलदो यस्य मौदोका स्यात् कदाचन।
अब्दाद् दशम्यो मासेभ्यो राष्ट्रभ्रंशं स गच्छति।। (अर्थ० परिशिष्टम् २.५.२)।
[३९] एते चारणवैद्यानां पठ्यन्ते। कौशिकसूत्र ६.३७ की टीका में केशव।
चारणवैर्यजङ्घे च०। अथर्वपरिशिष्टम् २२.२.४।
[४०] तथा चारणवैद्यानां प्रमाणं संहितां शृणु।
षड्सहस्रमृचामुत्कम् ऋचः षड्विंशतिः पुनः।। वायपु० ६१..६९, ब्रह्माण्डपुराणम् २.३५.७८
[४१] भागवतपुराणम् १२.७.१-३, वायुपुराणम् ६१.४९-५३, विष्णपुराणम् ३.६.९-१३ ब्रह्माण्डपुराणम् २.३५.७८ पूर्वभागः, द्वितीयपादः ३५, ५५-६१।
[४२] वैदिकवाङ्मय का इतिहास, पृ० २२०-२३१।

**अथर्ववेदपरिचयः**

अथर्ववेदे काण्डादिनिरूपणं तद् विभाजनञ्च। अथर्ववेदे विंशति काण्डानि, सूक्तसङ्ख्या ७३० तथा मन्त्रसङ्ख्या ५९८७ विद्यते। अथर्ववेदाऽध्ययनेन ज्ञायते यदथर्ववेदीयकाण्डानां विभाजनं विशिष्टशैल्या जातम्। अथर्ववेदीय प्रारभिकाष्टादशकाण्डानि त्रिधा विभक्तुं शक्यन्ते। प्रथमो विभागः १-७ यावत् द्वितीयो विभाग: ८-१२ यावत् तृतीयविभागश्च १३-१८ यावत्।

१. **प्रथमविभागे** काण्डं १-७ यावत् एतद्वैशिष्ट्यमस्ति यत् प्रतिसूक्ते मन्त्राणां सङ्ख्या कियती वर्तते। तेनैव प्रकारेण ते काण्डेषु स्थापिता सन्ति। प्रथमकाण्डस्य प्रतिसूक्ते मन्त्राः ४, द्वितीयकाण्डे ५, तृतीयकाण्डे ६, चतुर्थे ७ अथवा ८, पञ्चमे ८ इतोऽप्याधिको वा। अनेन ज्ञायते यदग्रिमकाण्डेषु प्रतिसूक्ते सङ्ख्या वृद्धिङ्गता। षष्ठकाण्डे १४२ सूक्तानि सन्ति प्राय: प्रतिसूक्ते सङ्ख्या वृद्धिङ्गता। षष्ठकाण्डे १४२ सूक्तानि सन्ति प्राय: प्रतिसूक्ते मन्त्रत्रयमस्ति। सप्तमकाण्डे ११८ सूक्तानि सन्ति प्रतिसूक्ते एको मन्त्रद्वयवा वर्तते। एकत: षष्ठकाण्डं यावत् अग्रिमकाण्डे मन्त्र सङ्ख्या वर्द्धिता। यथा प्रथमकाण्डे मन्त्रसङ्ख्या १५३, द्वितीये २०७, तृतीये २०३, तुरीये ३२४, पञ्चमे ३७६, षष्ठे ४५४, सप्तमे च २८६ मन्त्रा: सन्ति।

**द्वितीयविभागः** - अत्र ८-१२ काण्डं यावदस्ति। अत्रापि विषयवैचित्र्यमस्ति लम्वायमानानि सूक्तानि च सन्ति। द्वादशकाण्डस्य प्रथमसूक्ते ६३ मन्त्रा: सन्ति, एकादशकाण्डस्य तृतीयसूक्ते ५६ मन्त्रा: सन्ति। इत्थं ज्ञायते यदेषु काण्डेषु विभिन्नविषयोपदमन्त्रबाहुल्यमन्त्रवन्ति सूक्तानि स्थापितानि सन्ति।

**तृतीयोविभागः** - अत्र १३-१८ काण्डानि सन्ति। एष्वपि बाहुल्यमन्त्रवन्ति सन्ति सूक्तानि। परन्त्वत्र विषयाणामैक्यमस्ति।

१९-२० काण्डद्वयं शौनकीयसंहितायां पश्चान्मिश्रीकृतमिति प्रतीयते। अस्येमानि कारणानि सन्ति (क) पञ्चपटलिकाया ५-१४ खण्डयोः अस्यां संहितायां केवलं १८ काण्डानामुल्लेखो वर्तते। (ख) शौनकीयचतुरध्यायिकायां अस्यां संहितायां १८ काण्डीयमन्त्रा: प्रतीकत्वेनैवोद्धृता: सन्ति। (ग) कौशिकवैतानसूत्रयोरपि १८ काण्डीयमन्त्रा: प्रतीकत्वेनैवोद्धृता। (घ) बृहत्सर्वानुक्रमण्यां १९ काण्डीय ऋषि-देवता-छन्दादयो दत्ता: सन्ति। २० काण्डीय ऋष्यादयो आश्वलायन-अनुक्रमणीतो गृहीता: सन्ति।

**अथर्ववेदीयविषयविवेचनम्**

**प्रथमकाण्डे** - सूक्तानां मन्त्राणां च सङ्ख्या १५३ वर्तते। अत्र विविधरोगाणां निवृत्ति: पाशमोचनरक्षोनाशनशर्मप्राप्तिदीर्घायुप्रापका मन्त्रा: सन्ति।

**द्वितीयकाण्डे** - सूक्तानि ३६ मन्त्राश्च २०७ सन्ति। अत्र विविधरोगनाशनशत्रुनाशन-क्रिमिनाशनदीर्घायुष्यप्रदा:मन्त्रा: सन्ति।

**तृतीयकाण्डे** - ३१ सूक्तानि २३० मन्त्रा: सन्ति। अत्र शत्रुसैन्यसम्मोहनराजनिर्वाचन-शालानिर्माणकृषिपशुपालनरोगनाशादीनां वर्णनमस्ति।

**चतुर्थेकाण्डे** - सूक्तसङ्ख्या ४० मन्त्रसङ्ख्या च ३२४ विद्यते। अत्र ब्रह्मविद्या, राज्याभिषेक-वृष्टि-पापमोचन-ब्रह्मौदनानां निरूपणमस्ति।

**पञ्चमकाण्डे -** सूक्तानि ३१, मन्त्राश्च ३७६ सन्ति। अत्र ब्रह्मविद्यालाक्षा-शत्रुनाशन-विषनाशन-ब्रह्मगवी-कृत्यापरिहारादीनां वर्णनमस्ति।

**षष्ठे काण्डे -** सूक्त सङ्ख्या १४२ मन्त्र संख्या च ४५४ विद्यते। अत्र रोगनाशन-शत्रुनाशन-दुष्वप्ननाशनबलप्राप्तिअन्यसमृद्धीनां वर्णनमस्ति।

**सप्तमे काण्डे -** सूक्तानि ११८ मन्त्राश्च २८६ सन्ति। अत्र आत्मा-अञ्जन-पूर्णिमा-अमावास्या-पापनाशानां वर्णनमस्ति।

**अष्टमे काण्डे** - सूक्तसङ्ख्या १० मन्त्रसङ्ख्या च २९३ विद्यते। अत्र दीर्घायुप्राप्तिशत्रुनाशन-प्रतिसारमपि-विराडादीनां निरूपणमस्ति।

**नवमे काण्डे -** सूक्त सङ्ख्या १० मन्त्र सङ्ख्या ३१३ वर्तते। अत्र मधुविद्या-कामशाला-पञ्चौदन-अत्र अतिथिसत्कार-गौ-यक्ष्मनाशनम् आत्मादीनां निरूपणमस्ति।

**दशमे काण्डे** - सूक्तानि १० मन्त्राश्च ३५० सन्ति। अत्र कृत्यानिवारण-ब्रह्मविद्या-वरणमपि-सर्पविषनाशन-विजयपाणि-मणिबन्धन-ज्येष्ठब्रह्म-गवादीनां वर्णनमस्ति।

**एकादशे काण्डे** - १० सूक्तानि मन्त्राश्च ३१३ सन्ति। अत्र ब्रह्मौदनं, रुद्र-प्राण-ब्रह्मचर्य-पापमोचन-ब्रह्म-शमनाशनादीनां निरूपणमस्ति।

**द्वादशे काण्डे** - सूक्त सङ्ख्या ५, मन्त्रसङ्ख्या ३०४ वर्तते। अत्र भूमिसूक्त-ब्रह्मगवी-स्वर्गौदन-वशगौरित्यादीनां वर्णनमस्ति।

**त्रयोदशे काण्डे -** ९ सूक्तानि मन्त्राश्च १८८ सन्ति। अत्रा ध्यात्मनिरूपणमस्ति।

**चतुर्दशे काण्डे** - सूक्तद्वयं मन्त्राश्च १३९ सन्ति। अत्र विवाहसंस्कारवर्णनमस्ति।

**पञ्चदशे काण्डे** - सूक्तानि १८ मन्त्राश्च २३० सन्ति। अत्र व्रात्य-ब्रह्मवर्णनमस्ति।

**षोडशे काण्डे -** ९ सूक्तानि मन्त्राश्च १०३ सन्ति। अत्र दु:खदानववर्णनमस्ति।

**सप्तदशे काण्डे** - सूक्तैकं मन्त्राश्च ३० सन्ति। अत्राभ्युदयार्थं प्रार्थना वर्तते।

**अष्टादशे काण्डे -** सूक्तचतुष्टयं मन्त्राश्च २८३ सन्ति। अत्र पितृमेध-निरूपणमस्ति।

**उनविंशे काण्डे** - सूक्तसङ्ख्या ७२ मन्त्रसङ्ख्या च ४५३ वर्तते। अत्र यज्ञ-पुरुषसूक्त-नक्षत्र-विविधमणि-छन्द-अथर्ववेदविभाजन-काम-कालादीनां वर्णनमस्ति।

**विंशतिकाण्डे -** खिलसूक्तैः सह सूक्तसङ्ख्या १४३ मन्त्रसङ्ख्या च ९५८ वर्तते। अत्र सोमयागवर्णनमस्ति। अधिकांशत: इन्द्रविषयकाणि सन्ति सूक्तानि। एतत्काण्डीय १२७ सक्तेषु परीक्षित्राज्यशासनवर्णनमस्ति।

**जयन्तपति त्रिपाठी**

शोधच्छात्रः – वेदविभागः

सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी